# Lokanatha Stotram

# लोकनाथस्तोत्रम्

## Document Information

Text title : Lokanatha Stotram

File name : lokanAthastotram.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# लोकनाथस्तोत्रम्

कल्पादिके भवसि को हि ममागभाव सर्वस्वसार करुणामय विश्वमूर्ते ।
कार्यादिके प्रणमतीति समन्तकं त्वां श्रीलोकनाथ तव पादयुगं नमेऽहम् ॥ १॥

आकृष्णकेन रजसा विनिवर्तमानश्चायासि सौम्य सकलः प्रतिवासरे च ।
हेमस्वरूपरथकेन समुज्ज्वलेन श्रीलोकनाथ तव पादयुगं नमेऽहम् ॥ २॥

ब्रह्मा त्वमेव हि स विप्रकुलप्रसिद्धो विष्णुश्च वैष्णवमते वरधर्मकेतुः ।
सर्वज्ञकोऽसि विमते प्रभवोऽव्ययश्च श्रीलोकनाथ तव पादयुगं नमेऽहम् ॥ ३॥

बौद्धान्वये भवसि वज्रकसूर्यरूपो योगेश्वरो हि शुभयोगकमार्गकेषु ।
गङ्गाधरो भवभयस्य विनाशकारि श्रीलोकनाथ तव पादयुगं नमेऽहम् ॥ ४॥

कारुण्यभावहृदयः सहजः सरोचिर्विच्छिन्नकल्मषचयो गुणसागरश्च ।
चिन्तामणिस्त्वमसि लोकगुरुः कृपेश श्रीलोकनाथ तव पादयुगं नमेऽहम् ॥ ५॥

बन्धूकवर्ण बहुरूप विशालनेत्र सर्वप्रसूतिकृतनिष्कृतिकः सुदन्त ।
त्वं पद्मपाणि विमलोत्तम मित्ररूपः श्रीलोकनाथ तव पादयुगं नमेऽहम् ॥ ६॥

तव बहुलचरित्रं कः समर्थोऽस्ति वक्तुं
तदपि मुखरभावैः स्तूयसे त्वं मयात्र ।
यदपि पदमशुद्धं सर्वमेतत् क्षमस्व
स्तुतिरिति कुसुमस्रक् भक्तिमात्रार्चनं स्यात् ॥ ७॥

इति श्रीमदार्यावलोकितेश्वरभट्टारकस्य स्तोत्रं सम्पूर्णम् ॥

*Lokanatha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*